श्रुनः स परमद्युतिः । दत्त्वा च तपतां श्रेष्ठो दिवमाचक्रमे ततः । दृष्ट्वा कुमारं जातं सा वार्ष्णेयी दीनमानसा । एकाग्रं चिन्तयामास किं कृत्वा सुकृतं भवेत् । गूहमानापचारं सा बन्धुपक्षभयात्तदा । उत्ससर्ज्ज कुमारं तं जले कुन्ती महाबलम्” ।

युधिष्ठिराद्युत्पत्तिस्तत्रैव १२२।१२३ अ० यथा

“एवमुक्ता ततः कुन्ती पाण्डुं परपुरञ्जयम् । प्रत्युवाच वरारोहा भर्त्तुः प्रियहिते रता । पितृवेश्मन्यहं बाला नियुक्ताऽतिथिपूजने । उग्रं पर्य्यचरन्तत्र ब्राह्मणं शंसितव्रतम् । निगूढनिश्चयं धर्म्मे यन्तं दुर्व्वाससं विदुः । तमहं शंसितात्मानं सर्व्वयत्नैरतोषयम् । स मेऽभिचारसंयुक्तमाचष्ट भगवान् वरम् । मन्त्रन्त्विमञ्च मे प्रादादब्रवीच्चैव मामिदम् । यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि । अकामो वा सकामो वा वशं ते समुपैष्यति । तस्य तस्य प्रसादात्ते राज्ञि ! पुत्रो भविष्यति । इत्युक्ताहं तदा तेन पितृवेश्मनि भारत ! । ब्राह्मणस्य वचस्तथ्यं तस्य कालोऽयमागतः । अनुज्ञाता त्वया देवमाह्वयेयमहं नृप ! । तेन मन्त्रेण राजर्षे ! यथा स्यान्नौ प्रजा हिता । आवाहयामि कं देवं ब्रूहि सत्यवतांवर ! । त्वत्तोऽनुज्ञाप्रतीक्षां मां विद्ध्यस्मिन् कर्म्मणि स्थिताम् । पाण्डुरुवाच । अद्यैव त्वं वरारोहे ! प्रयतस्व यथाविधि । धर्म्ममावाहय शुभे ! स हि देवेषु पुण्यभाक् । अधर्म्मेण न नो धर्म्मः संयुज्येत कथञ्चन । लोकश्चायं वरारोहे ! धर्म्मोऽयमिति मन्यते । धार्म्मिकश्च कुरूणां स भविष्यति न संशयः । धर्म्मेण चापि दत्तस्य नाधर्म्मे रंस्यते मनः । तस्माद्धर्म्मं पुरस्कृत्य नियता त्वं शुचिस्मिते ! । उपचाराभिचाराभ्यां धर्म्ममावाहयस्व वै । वैशम्पायन उवाच । सा तथोक्ता तथेत्युक्ता तेन भर्त्रा वराङ्गना । अभिवाद्याभ्यनुज्ञाता प्रदक्षिणमवर्त्तत” । “संवत्सरधृते गर्भे गान्धार्य्या जनमेजय । आह्वयामास वै कुन्ती गर्भार्थं धर्म्ममच्युतम् । सा बलिं त्वरिता देवी धर्म्मायोपजहार ह । जजाप विधिवज्जप्यं दत्तं दुर्व्वाससा पुरा । आजगाम ततो देवो धर्म्मो मन्त्रबलात्ततः । विमाने सूर्य्यसङ्काशे कुन्ती यत्र जपस्थिता । विहस्य तां ततो ब्रूयाः कुन्ति ! किन्ते ददाम्यहम् । सा तं विहस्यमानापि पुत्रं देह्यब्रवीदिदम् । संयुक्ता सा हि धर्म्मेण योगमूर्त्तिधरेण ह । लेभे पुत्रं वरारोहा सर्व्वप्राणभृतां हितम् । ऐन्द्रे (ज्येष्ठाभे) चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे । दिवामध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते । समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम् । जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी । एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः । विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति । युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः । भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः । यशसा तेजसा चैव वृत्तेन च समन्वितः । धार्म्मिकं तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत् । प्राहुः क्षत्रं बलज्येष्ठं बलश्रेष्ठं सुतं वृणु । ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा । ततस्तामागतो वायुर्मृगारूढो महाबलः । किन्ते कुन्ति ! ददाम्यद्य ब्रूहि यत्ते हृदि स्थितम् । सा सलज्जा विहस्याह पुत्रं देहि सुरोत्तम ! । बलवन्तं महाकायं सर्व्वदर्पप्रभञ्जनम् । तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः । तमप्यतिबलं जातं वागुवाचाशरीरिणी । सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत । इदमत्यद्भुतं चासीज्जातमात्रे वृकोदरे । यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत् । कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल । नान्वबुध्यत संसुप्तमुत्सङ्गे स्वे वृकोदरम् । ततः स वज्रसङ्घातः कुमारो न्यपतद्गिरौ । पतता तेन शतधा शिला गात्रैर्विचूर्णिता । तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्विस्मयमागतः । यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम ! । दुर्य्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप ! । जाते वृकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत् । कथं नु मे वरः पुत्रो लोकश्रेष्ठो भवेदिति । दैवे पुरुषकारे च लोकोऽयं सम्प्रतिष्ठितः । तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते । इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम् । अप्रमेयबलोत्साहो वीर्य्यवानमितद्युतिः । सन्तोषयित्वा तपसा पुत्रं लप्स्ये महाबलम् । यं दास्यति स मे पुत्रं स वरीयान् भविष्यति । अमानुषान्मानुषांश्च संग्रामे स हनिष्यति । कर्म्मणा मनसा वाचा तस्मात्तप्स्ये महत्तपः । ततः पाण्डुर्महाराजो मन्त्रयित्वा महर्षिभिः । दिदेश कुन्त्याः कौरव्यो व्रतं संवत्सरं शुभम् । आत्मना च महाबाहुरेकपादस्थितोऽभवत् । उग्रं स तप आस्थाय परमेण समाधिना । आरिराधयिषुर्द्देवं त्रिदशानां तमीश्वरम् । भार्य्यया सह धर्म्मात्मा पर्य्यतप्यत भारत ! । तन्तु कालेन